# Chanakya Niti

# ચાણક્યનીતિ

## Document Information

Text title : chANakya nItI

File name : chANakyanItisort.itx

Category : major_works, chANakya, upadesha, subhAShita, subhaashita

Location : doc_z_misc_major_works

Author : Chanakya [circa 350 B.C.]

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : A manual of ethics/morals

Latest update : October 8,2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 11, 2024

*sanskritdocuments.org*

# ચાણક્યનીતિ

પ્રણમ્ય શિરસા વિષ્ણું ત્રૈલોક્યાધિપતિં પ્રભુમ્ ।
નાનાશાસ્ત્રોદ્ધૃતં વક્ષ્યે રાજનીતિસમુચ્ચયમ્ ॥ ૦૧-૦૧
અધીત્યેદં યથાશાસ્ત્રં નરો જાનાતિ સત્તમઃ ।
ધર્મોપદેશવિખ્યાતં કાર્યાકાર્યં શુભાશુભમ્ ॥ ૦૧-૦૨
તદહં સમ્પ્રવક્ષ્યામિ લોકાનાં હિતકામ્યયા ।
યેન વિજ્ઞાતમાત્રેણ સર્વજ્ઞાત્વં પ્રપદ્યતે ॥ ૦૧-૦૩
મૂર્ખશિષ્યોપદેશેન દુષ્ટસ્ત્રીભરણેન ચ ।
દુઃખિતૈઃ સમ્પ્રયોગેણ પણ્ડિતોઽપ્યવસીદતિ ॥ ૦૧-૦૪
દુષ્ટા ભાર્યા શઠં મિત્રં ભૃત્યશ્ચોત્તરદાયકઃ ।
સસર્પે ચ ગૃહે વાસો મૃત્યુરેવ ન સંશયઃ ॥ ૦૧-૦૫
આપદર્થે ધનં રક્ષેદ્દારાન્ રક્ષેદ્ધનૈરપિ ।
આત્માનં સતતં રક્ષેદ્દારૈરપિ ધનૈરપિ ॥ ૦૧-૦૬
આપદર્થે ધનં રક્ષેચ્છ્રીમતાં કુત આપદઃ ।
કદાચિચ્ચલતે લક્ષ્મીઃ સઞ્ચિતોઽપિ વિનશ્યતિ ॥ ૦૧-૦૭
યસ્મિન્દેશે ન સમ્માનો ન વૃત્તિર્ન ચ બાન્ધવાઃ ।
ન ચ વિદ્યાગમોઽપ્યસ્તિ વાસં તત્ર ન કારયેત્ ॥ ૦૧-૦૮
ધનિકઃ શ્રોત્રિયો રાજા નદી વૈદ્યસ્તુ પઞ્ચમઃ ।
પઞ્ચ યત્ર ન વિદ્યન્તે ન તત્ર દિવસં વસેત્ ॥ ૦૧-૦૯
લોકયાત્રા ભયં લજ્જા દાક્ષિણ્યં ત્યાગશીલતા ।
પઞ્ચ યત્ર ન વિદ્યન્તે ન કુર્યાત્તત્ર સંસ્થિતિમ્ ॥ ૦૧-૧૦
જાનીયાત્પ્રેષણે ભૃત્યાન્બાન્ધવાન્ વ્યસનાગમે ।
મિત્રં ચાપત્તિકાલેષુ ભાર્યાં ચ વિભવક્ષયે ॥ ૦૧-૧૧
આતુરે વ્યસને પ્રાપ્તે દુર્ભિક્ષે શત્રુસઙ્કટે ।
રાજદ્વારે શ્મશાને ચ યસ્તિષ્ઠતિ સ બાન્ધવઃ ॥ ૦૧-૧૨
યો ધ્રુવાણિ પરિત્યજ્ય અધ્રુવં પરિષેવતે ।

ધ્રુવાણિ તસ્ય નશ્યન્તિ ચાધ્રુવં નષ્ટમેવ હિ ॥ ૦૧-૧૩
વરયેત્કુલજાં પ્રાજ્ઞો વિરૂપામપિ કન્યકામ્ ।
રૂપશીલાં ન નીચસ્ય વિવાહઃ સદૃશે કુલે ॥ ૦૧-૧૪
નદીનાં શસ્ત્રપાણીનાંનખીનાં શ‌ૃઙ્ગિણાં તથા ।
વિશ્વાસો નૈવ કર્તવ્યઃ સ્ત્રીષુ રાજકુલેષુ ચ ॥ ૦૧-૧૫
વિષાદપ્યમૃતં ગ્રાહ્યમમેધ્યાદપિ કાઞ્ચનમ્ ।
અમિત્રાદપિ સદ્વૃત્તં બાલાદપિ સુભાષિતમ્ ॥ ૦૧-૧૬
સ્ત્રીણાં દ્વિગુણ આહારો લજ્જા ચાપિ ચતુર્ગુણા ।
સાહસં ષડ્ગુણં ચૈવ કામશ્ચાષ્ટગુણઃ સ્મૃતઃ ॥ ૦૧-૧૭

---

અનૃતં સાહસં માયા મૂર્ખત્વમતિલોભિતા ।
અશૌચત્વં નિર્દયત્વં સ્ત્રીણાં દોષાઃ સ્વભાવજાઃ ॥ ૦૨-૦૧
ભોજ્યં ભોજનશક્તિશ્ચ રતિશક્તિર્વરાઙ્ગના ।
વિભવો દાનશક્તિશ્ચ નાલ્પસ્ય તપસઃ ફલમ્ ॥ ૦૨-૦૨
યસ્ય પુત્રો વશીભૂતો ભાર્યા છન્દાનુગામિની ।
વિભવે યશ્ચ સન્તુષ્ટસ્તસ્ય સ્વર્ગ ઇહૈવ હિ ॥ ૦૨-૦૩
તે પુત્રા યે પિતુર્ભક્તાઃ સ પિતા યસ્તુ પોષકઃ ।
તન્મિત્રં યત્ર વિશ્વાસઃ સા ભાર્યા યત્ર નિર્વૃતિઃ ॥ ૦૨-૦૪
પરોક્ષે કાર્યહન્તારં પ્રત્યક્ષે પ્રિયવાદિનમ્ ।
વર્જયેત્તાદૃશં મિત્રં વિષકુમ્ભં પયોમુખમ્ ॥ ૦૨-૦૫
ન વિશ્વસેત્કુમિત્રે ચ મિત્રે ચાપિ ન વિશ્વસેત્ ।
કદાચિત્કુપિતં મિત્રં સર્વં ગુહ્યં પ્રકાશયેત્ ॥ ૦૨-૦૬
મનસા ચિન્તિતં કાર્યં વાચા નૈવ પ્રકાશયેત્ ।
મન્ત્રેણ રક્ષયેદ્ગૂઢં કાર્યે ચાપિ નિયોજયેત્ ॥ ૦૨-૦૭
કષ્ટં ચ ખલુ મૂર્ખત્વં કષ્ટં ચ ખલુ યૌવનમ્ ।
કષ્ટાત્કષ્ટતરં ચૈવ પરગેહનિવાસનમ્ ॥ ૦૨-૦૮
શૈલે શૈલે ચ માણિક્યં મૌક્તિકં ન ગજે ગજે ।
સાધવો ન હિ સર્વત્ર ચન્દનં ન વને વને ॥ ૦૨-૦૯
પુત્રાશ્ચ વિવિધૈઃ શીલૈર્નિયોજ્યાઃ સતતં બુધૈઃ ।
નીતિજ્ઞાઃ શીલસમ્પન્ના ભવન્તિ કુલપૂજિતાઃ ॥ ૦૨-૧૦
માતા શત્રુઃ પિતા વૈરી યાભ્યાં બાલા ન પાઠિતાઃ ।

સભામધ્યે ન શોભન્તે હંસમધ્યે બકો યથા ॥ ૦૨-૧૧
લાલનાદ્બહવો દોષાસ્તાડને બહવો ગુણાઃ ।
તસ્માત્પુત્રં ચ શિષ્યં ચ તાડયેન્ન તુ લાલયેત્ ॥ ૦૨-૧૨
શ્લોકેન વા તદર્ધેન તદર્ધાર્ધાક્ષરેણ વા ।
અબન્ધ્યં દિવસં કુર્યાદ્દાનાધ્યયનકર્મભિઃ ॥ ૦૨-૧૩
કાન્તાવિયોગઃ સ્વજનાપમાનં
ઋણસ્ય શેષં કુનૃપસ્ય સેવા ।
દારિદ્ર્યભાવાદ્વિમુખં ચ મિત્રં
વિનાગ્નિના પઞ્ચ દહન્તિ કાયમ્ ॥ ૦૨-૧૪
નદીતીરે ચ યે વૃક્ષાઃ પરગેહેષુ કામિની ।
મન્ત્રહીનાશ્ચ રાજાનઃ શીઘ્રં નશ્યન્ત્યસંશયમ્ ॥ ૦૨-૧૫
બલં વિદ્યા ચ વિપ્રાણાં રાજ્ઞાં સૈન્યં બલં તથા ।
બલં વિત્તં ચ વૈશ્યાનાં શૂદ્રાણાં પારિચર્યકમ્ ॥ ૦૨-૧૬
નિર્ધનં પુરુષં વેશ્યા પ્રજા ભગ્નં નૃપં ત્યજેત્ ।
ખગા વીતફલં વૃક્ષં ભુક્ત્વા ચાભ્યાગતો ગૃહમ્ ॥ ૦૨-૧૭
ગૃહીત્વા દક્ષિણાં વિપ્રાસ્ત્યજન્તિ યજમાનકમ્ ।
પ્રાપ્તવિદ્યા ગુરું શિષ્યા દગ્ધારણ્યં મૃગાસ્તથા ॥ ૦૨-૧૮
દુરાચારી દુરાદૃષ્ટિર્દુરાવાસી ચ દુર્જનઃ ।
યન્મૈત્રી ક્રિયતે પુંભિર્નરઃ શીઘ્રં વિનશ્યતિ ॥ ૦૨-૧૯
સમાને શોભતે પ્રીતિઃ રાજ્ઞિ સેવા ચ શોભતે ।
વાણિજ્યં વ્યવહારેષુ દિવ્યા સ્ત્રી શોભતે ગૃહે ॥ ૦૨-૨૦

---

કસ્ય દોષઃ કુલે નાસ્તિ વ્યાધિના કો ન પીડિતઃ ।
વ્યસનં કેન ન પ્રાપ્તં કસ્ય સૌખ્યં નિરન્તરમ્ ॥ ૦૩-૦૧
આચારઃ કુલમાખ્યાતિ દેશમાખ્યાતિ ભાષણમ્ ।
સમ્ભ્રમઃ સ્નેહમાખ્યાતિ વપુરાખ્યાતિ ભોજનમ્ ॥ ૦૩-૦૨
સુકુલે યોજયેત્કન્યાં પુત્રં વિદ્યાસુ યોજયેત્ ।
વ્યસને યોજયેચ્છત્રું મિત્રં ધર્મેણ યોજયેત્ ॥ ૦૩-૦૩
દુર્જનસ્ય ચ સર્પસ્ય વરં સર્પો ન દુર્જનઃ ।
સર્પો દંશતિ કાલે તુ દુર્જનસ્તુ પદે પદે ॥ ૦૩-૦૪
એતદર્થે કુલીનાનાં નૃપાઃ કુર્વન્તિ સઙ્ગ્રહમ્ ।

આદિમધ્યાવસાનેષુ ન તે ગચ્છન્તિ વિક્રિયામ્ ॥ ૦૩-૦૫
પ્રલયે ભિન્નમર્યાદા ભવન્તિ કિલ સાગરાઃ ।
સાગરા ભેદમિચ્છન્તિ પ્રલયેઽપિ ન સાધવઃ ॥ ૦૩-૦૬
મૂર્ખસ્તુ પ્રહર્તવ્યઃ પ્રત્યક્ષો દ્વિપદઃ પશુઃ ।
ભિદ્યતે વાક્ય-શલ્યેન અદૃશં કણ્ટકં યથા ॥ ૦૩-૦૭
રૂપયૌવનસમ્પન્ના વિશાલકુલસમ્ભવાઃ ।
વિદ્યાહીના ન શોભન્તે નિર્ગન્ધાઃ કિંશુકા યથા ॥ ૦૩-૦૮
કોકિલાનાં સ્વરો રૂપં સ્ત્રીણાં રૂપં પતિવ્રતમ્ ।
વિદ્યા રૂપં કુરૂપાણાં ક્ષમા રૂપં તપસ્વિનામ્ ॥ ૦૩-૦૯
ત્યજેદેકં કુલસ્યાર્થે ગ્રામસ્યાર્થે કુલં ત્યજેત્ ।
ગ્રામં જનપદસ્યાર્થે આત્માર્થે પૃથિવીં ત્યજેત્ ॥ ૦૩-૧૦
ઉદ્યોગે નાસ્તિ દારિદ્યં જપતો નાસ્તિ પાતકમ્ ।
મૌનેન કલહો નાસ્તિ નાસ્તિ જાગરિતે ભયમ્ ॥ ૦૩-૧૧
અતિરૂપેણ વા સીતા અતિગર્વેણ રાવણઃ ।
અતિદાનાદ્બલિર્બદ્ધો હ્યતિસર્વત્ર વર્જયેત્ ॥ ૦૩-૧૨
કો હિ ભારઃ સમર્થાનાં કિં દૂરં વ્યવસાયિનામ્ ।
કો વિદેશઃ સુવિદ્યાનાં કઃ પરઃ પ્રિયવાદિનામ્ ॥ ૦૩-૧૩
એકેનાપિ સુવૃક્ષેણ પુષ્પિતેન સુગન્ધિના ।
વાસિતં તદ્વનં સર્વં સુપુત્રેણ કુલં યથા ॥ ૦૩-૧૪
એકેન શુષ્કવૃક્ષેણ દહ્યમાનેન વહ્નિના ।
દહ્યતે તદ્વનં સર્વં કુપુત્રેણ કુલં યથા ॥ ૦૩-૧૫
એકેનાપિ સુપુત્રેણ વિદ્યાયુક્તેન સાધુના ।
આહ્લાદિતં કુલં સર્વં યથા ચન્દ્રેણ શર્વરી ॥ ૦૩-૧૬
કિં જાતૈર્બહુભિઃ પુત્રૈઃ શોકસન્તાપકારકૈઃ ।
વરમેકઃ કુલાલમ્બી યત્ર વિશ્રામ્યતે કુલમ્ ॥ ૦૩-૧૭
લાલયેત્પઞ્ચવર્ષાણિ દશવર્ષાણિ તાડયેત્ ।
પ્રાપ્તે તુ ષોડશે વર્ષે પુત્રે મિત્રવદાચરેત્ ॥ ૦૩-૧૮
ઉપસર્ગેઽન્યચક્રે ચ દુર્ભિક્ષે ચ ભયાવહે ।
અસાધુજનસમ્પર્કે યઃ પલાયેત્સ જીવતિ ॥ ૦૩-૧૯
ધર્માર્થકામમોક્ષાણાં યસ્યૈકોઽપિ ન વિદ્યતે ।
અજાગલસ્તનસ્યેવ તસ્ય જન્મ નિરર્થકમ્ ॥ ૦૩-૨૦
મૂર્ખા યત્ર ન પૂજ્યન્તે ધાન્યં યત્ર સુસઞ્ચિતમ્ ।

દામ્પત્યે કલહો નાસ્તિ તત્ર શ્રીઃ સ્વયમાગતા ॥ ०३-२१
અયમમૃતનિધાનં નાયકોઽપ્યોષધીનાં
    અમૃતમયશરીરઃ કાન્તિયુક્તોઽપિ ચન્દ્રઃ ।
ભવતિ વિગતરશ્મિર્મણ્ડલં પ્રાપ્ય ભાનોઃ
    પરસદનનિવિષ્ટઃ કો લઘુત્વં ન યાતિ ॥ ०३-३१ Ed. Sharma

---

આયુઃ કર્મ ચ વિત્તં ચ વિદ્યા નિધનમેવ ચ ।
પઞ્ચૈતાનિ હિ સૃજ્યન્તે ગર્ભસ્થસ્યૈવ દેહિનઃ ॥ ०४-०१
સાધુભ્યસ્તે નિવર્તન્તે પુત્રમિત્રાણિ બાન્ધવાઃ ।
યે ચ તૈઃ સહ ગન્તારસ્તદ્ધર્માત્સુકૃતં કુલમ્ ॥ ०४-०२
દર્શનધ્યાનસંસ્પર્શૈર્મત્સી કૂર્મી ચ પક્ષિણી ।
શિશું પાલયતે નિત્યં તથા સજ્જન-સંગતિઃ ॥ ०४-०३
યાવત્સ્વસ્થો હ્યયં દેહો યાવન્મૃત્યુશ્ચ દૂરતઃ ।
તાવદાત્મહિતં કુર્યાત્પ્રાણાન્તે કિં કરિષ્યતિ ॥ ०४-०४
કામધેનુગુણા વિદ્યા હ્યકાલે ફલદાયિની ।
પ્રવાસે માતૃસદૃશી વિદ્યા ગુપ્તં ધનં સ્મૃતમ્ ॥ ०४-०५
એકોઽપિ ગુણવાન્પુત્રો નિર્ગુણેન શતેન કિમ્ ।
એકશ્ચન્દ્રસ્તમો હન્તિ ન ચ તારાઃ સહસ્રશઃ ॥ ०४-०६
મૂર્ખશ્ચિરાયુર્જાતોઽપિ તસ્માજ્જાતમૃતો વરઃ ।
મૃતઃ સ ચાલ્પદુઃખાય યાવજ્જીવં જડો દહેત્ ॥ ०४-०७
કુગ્રામવાસઃ કુલહીનસેવા
    કુભોજનં ક્રોધમુખી ચ ભાર્યા ।
પુત્રશ્ચ મૂર્ખો વિધવા ચ કન્યા
    વિનાગ્નિના ષટ્પ્રદહન્તિ કાયમ્ ॥ ०४-०८
કિં તયા ક્રિયતે ધેન્વા યા ન દોગ્ધ્રી ન ગર્ભિણી ।
કોઽર્થઃ પુત્રેણ જાતેન યો ન વિદ્વાન્ ન ભક્તિમાન્ ॥ ०४-०९
સંસારતાપદગ્ધાનાં ત્રયો વિશ્રાન્તિહેતવઃ ।
અપત્યં ચ કલત્રં ચ સતાં સઙ્ગતિરેવ ચ ॥ ०४-१०
સકૃજ્જલ્પન્તિ રાજાનઃ સકૃજ્જલ્પન્તિ પણ્ડિતાઃ ।
સકૃત્કન્યાઃ પ્રદીયન્તે ત્રીણ્યેતાનિ સકૃત્સકૃત્ ॥ ०४-११
એકાકિના તપો દ્વાભ્યાં પઠનં ગાયનં ત્રિભિઃ ।

ચતુર્ભિર્ગમનં ક્ષેત્રં પઞ્ચભિર્બહુભી રણઃ ॥ ૦૪-૧૨
સા ભાર્યા યા શુચિર્દક્ષા સા ભાર્યા યા પતિવ્રતા ।
સા ભાર્યા યા પતિપ્રીતા સા ભાર્યા સત્યવાદિની ॥ ૦૪-૧૩
અપુત્રસ્ય ગૃહં શૂન્યં દિશઃ શૂન્યાસ્ત્વબાન્ધવાઃ ।
મૂર્ખસ્ય હૃદયં શૂન્યં સર્વશૂન્યા દરિદ્રતા ॥ ૦૪-૧૪
અનભ્યાસે વિષં શાસ્ત્રમજીર્ણે ભોજનં વિષમ્ ।
દરિદ્રસ્ય વિષં ગોષ્ઠી વૃદ્ધસ્ય તરુણી વિષમ્ ॥ ૦૪-૧૫
ત્યજેદ્ધર્મં દયાહીનં વિદ્યાહીનં ગુરું ત્યજેત્ ।
ત્યજેત્ક્રોધમુખીં ભાર્યાં નિઃસ્નેહાન્બાન્ધવાંસ્ત્યજેત્ ॥ ૦૪-૧૬
અધ્વા જરા દેહવતાં પર્વતાનાં જલં જરા ।
અમૈથુનં જરા સ્ત્રીણાં વસ્ત્રાણામાતપો જરા ॥ ૦૪-૧૭
ઇન્દ્રિયાણિ ચ સંયમ્ય બકવત્પણ્ડિતો નરઃ ।
દેશકાલબલં જ્ઞાત્વા સર્વકાર્યાણિ સાધયેત્ ॥ ૦૪-૧૭ Ed. Sharma
કઃ કાલઃ કાનિ મિત્રાણિ કો દેશઃ કૌ વ્યયાગમૌ ।
કશ્ચાહં કા ચ મે શક્તિરિતિ ચિન્ત્યં મુહુર્મુહુઃ ॥ ૦૪-૧૮
અગ્નિર્દેવો દ્વિજાતીનાં મુનીનાં હૃદિ દૈવતમ્ ।
પ્રતિમા સ્વલ્પબુદ્ધીનાં સર્વત્ર સમદર્શિનઃ ॥ ૦૪-૧૯

---

ગુરુરગ્નિર્દ્વિજાતીનાં વર્ણાનાં બ્રાહ્મણો ગુરુઃ ।
પતિરેવ ગુરુઃ સ્ત્રીણાં સર્વસ્યાભ્યાગતો ગુરુઃ ॥ ૦૫-૦૧
યથા ચતુર્ભિઃ કનકં પરીક્ષ્યતે
    નિઘર્ષણચ્છેદનતાપતાડનૈઃ ।
તથા ચતુર્ભિઃ પુરુષઃ પરીક્ષ્યતે
    ત્યાગેન શીલેન ગુણેન કર્મણા ॥ ૦૫-૦૨
તાવદ્ભયેષુ ભેતવ્યં યાવદ્ભયમનાગતમ્ ।
આગતં તુ ભયં વીક્ષ્ય પ્રહર્તવ્યમશઙ્કયા ॥ ૦૫-૦૩
એકોદરસમુદ્ભૂતા એકનક્ષત્રજાતકાઃ ।
ન ભવન્તિ સમાઃ શીલે યથા બદરકણ્ટકાઃ ॥ ૦૫-૦૪
અન્યાયાર્જિતવિત્તપૂર્ણમુદરં ગર્વેણ તુઙ્ગં શિરો
રે રે જમ્બુક મુઞ્ચ મુઞ્ચ સહસા નીચં સુનિન્દ્યં વપુઃ ॥ ૦૫-૦૫ Ed. Sharma
નિઃસ્પૃહો નાધિકારી સ્યાન્ નાકામો મણ્ડનપ્રિયઃ ।

નાવિદગ્ધઃ પ્રિયં બ્રૂયાત્સ્પષ્ટવક્તા ન વઞ્ચકઃ ॥ ૦૫-૦૫
મૂર્ખાણાં પણ્ડિતા દ્વેષ્યા અધનાનાં મહાધનાઃ ।
પરાંગના કુલસ્ત્રીણાં સુભગાનાં ચ દુર્ભગાઃ ॥ ૦૫-૦૬
આલસ્યોપગતા વિદ્યા પરહસ્તગતં ધનમ્ ।
અલ્પબીજં હતં ક્ષેત્રં હતં સૈન્યમનાયકમ્ ॥ ૦૫-૦૭
અભ્યાસાદ્ધાર્યતે વિદ્યા કુલં શીલેન ધાર્યતે ।
ગુણેન જ્ઞાયતે ત્વાર્યઃ કોપો નેત્રેણ ગમ્યતે ॥ ૦૫-૦૮
વિત્તેન રક્ષ્યતે ધર્મો વિદ્યા યોગેન રક્ષ્યતે ।
મૃદુના રક્ષ્યતે ભૂપઃ સત્સ્ત્રિયા રક્ષ્યતે ગૃહમ્ ॥ ૦૫-૦૯
અન્યથા વેદશાસ્ત્રાણિ જ્ઞાનપાણ્ડિત્યમન્યથા ।
અન્યથા તત્પદં શાન્તં લોકાઃ ક્લિશ્યન્તિ ચાહ્ન્યથા ॥ ૦૫-૧૦
દારિદ્યનાશનં દાનં શીલં દુર્ગતિનાશનમ્ ।
અજ્ઞાનનાશિની પ્રજ્ઞા ભાવના ભયનાશિની ॥ ૦૫-૧૧
નાસ્તિ કામસમો વ્યાધિર્નાસ્તિ મોહસમો રિપુઃ ।
નાસ્તિ કોપસમો વહ્નિર્નાસ્તિ જ્ઞાનાત્પરં સુખમ્ ॥ ૦૫-૧૨
જન્મમૃત્યૂ હિ યાત્યેકો ભુનક્ત્યેકઃ શુભાશુભમ્ ।
નરકેષુ પતત્યેક એકો યાતિ પરાં ગતિમ્ ॥ ૦૫-૧૩
તૃણં બ્રહ્મવિદઃ સ્વર્ગસ્તૃણં શૂરસ્ય જીવિતમ્ ।
જિતાશસ્ય તૃણં નારી નિઃસ્પૃહસ્ય તૃણં જગત્ ॥ ૦૫-૧૪
વિદ્યા મિત્રં પ્રવાસે ચ ભાર્યા મિત્રં ગૃહેષુ ચ ।
વ્યાધિતસ્યૌષધં મિત્રં ધર્મો મિત્રં મૃતસ્ય ચ ॥ ૦૫-૧૫
વૃથા વૃષ્ટિઃ સમુદ્રેષુ વૃથા તૃપ્તસ્ય ભોજનમ્ ।
વૃથા દાનં સમર્થસ્ય વૃથા દીપો દિવાપિ ચ ॥ ૦૫-૧૬
નાસ્તિ મેઘસમં તોયં નાસ્તિ ચાત્મસમં બલમ્ ।
નાસ્તિ ચક્ષુઃસમં તેજો નાસ્તિ ધાન્યસમં પ્રિયમ્ ॥ ૦૫-૧૭
અધના ધનમિચ્છન્તિ વાચં ચૈવ ચતુષ્પદાઃ ।
માનવાઃ સ્વર્ગમિચ્છન્તિ મોક્ષમિચ્છન્તિ દેવતાઃ ॥ ૦૫-૧૮
સત્યેન ધાર્યતે પૃથ્વી સત્યેન તપતે રવિઃ ।
સત્યેન વાતિ વાયુશ્ચ સર્વં સત્યે પ્રતિષ્ઠિતમ્ ॥ ૦૫-૧૯
ચલા લક્ષ્મીશ્ચલાઃ પ્રાણાશ્ચલે જીવિતમન્દિરે ।
ચલાચલે ચ સંસારે ધર્મ એકો હિ નિશ્ચલઃ ॥ ૦૫-૨૦
નરાણાં નાપિતો ધૂર્તઃ પક્ષિણાં ચૈવ વાયસઃ ।

ચતુષ્પાદં શ઼ૃગાલસ્તુ સ્ત્રીણાં ધૂર્તા ચ માલિની ॥ ૦૫-૨૧
જનિતા ચોપનેતા ચ યસ્તુ વિદ્યાં પ્રયચ્છતિ ।
અન્નદાતા ભયત્રાતા પઞ્ચૈતે પિતરઃ સ્મૃતાઃ ॥ ૦૫-૨૨
રાજપત્ની ગુરોઃ પત્ની મિત્રપત્ની તથૈવ ચ ।
પત્નીમાતા સ્વમાતા ચ પઞ્ચૈતા માતરઃ સ્મૃતાઃ ॥ ૦૫-૨૩

---

શ્રુત્વા ધર્મં વિજાનાતિ શ્રુત્વા ત્યજતિ દુર્મતિમ્ ।
શ્રુત્વા જ્ઞાનમવાપ્નોતિ શ્રુત્વા મોક્ષમવાપ્નુયાત્ ॥ ૦૬-૦૧
પક્ષિણઃ કાકશ્ચણ્ડાલઃ પશૂનાં ચૈવ કુક્કુરઃ ।
મુનીનાં પાપશ્ચણ્ડાલઃ સર્વચાણ્ડાલનિન્દકઃ ॥ ૦૬-૦૨
ભસ્મના શુદ્ધ્યતે કાસ્યં તામ્રમમ્લેન શુદ્ધ્યતિ ।
રજસા શુદ્ધ્યતે નારી નદી વેગેન શુદ્ધ્યતિ ॥ ૦૬-૦૩
ભ્રમન્સમ્પૂજ્યતે રાજા ભ્રમન્સમ્પૂજ્યતે દ્વિજઃ ।
ભ્રમન્સમ્પૂજ્યતે યોગી સ્ત્રી ભ્રમન્તી વિનશ્યતિ ॥ ૦૬-૦૪
યસ્યાર્થાસ્તસ્ય મિત્રાણિ યસ્યાર્થાસ્તસ્ય બાન્ધવાઃ ।
યસ્યાર્થાઃ સ પુમાઁલ્લોકે યસ્યાર્થાઃ સ ચ પણ્ડિતઃ ॥ ૦૬-૦૫
તાદૃશી જાયતે બુદ્ધિર્વ્યવસાયોઽપિ તાદૃશઃ ।
સહાયાસ્તાદૃશા એવ યાદૃશી ભવિતવ્યતા ॥ ૦૬-૦૬
કાલઃ પચતિ ભૂતાનિ કાલઃ સંહરતે પ્રજાઃ ।
કાલઃ સુપ્તેષુ જાગર્તિ કાલો હિ દુરતિક્રમઃ ॥ ૦૬-૦૭
ન પશ્યતિ ચ જન્માન્ધઃ કામાન્ધો નૈવ પશ્યતિ ।
મદોન્મત્તા ન પશ્યન્તિ અર્થી દોષં ન પશ્યતિ ॥ ૦૬-૦૮
સ્વયં કર્મ કરોત્યાત્મા સ્વયં તત્ફલમશ્નુતે ।
સ્વયં ભ્રમતિ સંસારે સ્વયં તસ્માદ્વિમુચ્યતે ॥ ૦૬-૦૯
રાજા રાષ્ટ્રકૃતં પાપં રાજ્ઞઃ પાપં પુરોહિતઃ ।
ભર્તા ચ સ્ત્રીકૃતં પાપં શિષ્યપાપં ગુરુસ્તથા ॥ ૦૬-૧૦
ઋણકર્તા પિતા શત્રુર્માતા ચ વ્યભિચારિણી ।
ભાર્યા રૂપવતી શત્રુઃ પુત્રઃ શત્રુરપણ્ડિતઃ ॥ ૦૬-૧૧
લુબ્ધમર્થેન ગૃહ્ણીયાત્ સ્તબ્ધમઞ્જલિકર્મણા ।
મૂર્ખં છન્દોઽનુવૃત્ત્યા ચ યથાર્થત્વેન પણ્ડિતમ્ ॥ ૦૬-૧૨
વરં ન રાજ્યં ન કુરાજરાજ્યં

વરં ન મિત્રં ન કુમિત્રમિત્રમ્ ।
વરં ન શિષ્યો ન કુશિષ્યશિષ્યો
વરં ન દાર ન કુદરદારઃ ॥ ૦૬-૧૩
કુરાજરાજ્યેન કુતઃ પ્રજાસુખં
કુમિત્રમિત્રેણ કુતોऽભિનિર્વૃતિઃ ।
કુદારદારૈશ્ચ કુતો ગૃહે રતિઃ
કુશિષ્યશિષ્યમધ્યાપયતઃ કુતો યશઃ ॥ ૦૬-૧૪
સિંહાદેકં બકાદેકં શિક્ષેચ્ચત્વારિ કુક્કુટાત્ ।
વાયસાત્પઞ્ચ શિક્ષેચ્ચ ષટ્શુનસ્ત્રીણિ ગર્દભાત્ ॥ ૦૬-૧૫
પ્રભૂતં કાર્યમલ્પં વા યન્નરઃ કર્તુમિચ્છતિ ।
સર્વારમ્ભેણ તત્કાર્યં સિંહાદેકં પ્રચક્ષતે ॥ ૦૬-૧૬
ઇન્દ્રિયાણિ ચ સંયમ્ય રાગદ્વેષવિવર્જિતઃ ।
સમદુઃખસુખઃ શાન્તઃ તત્ત્વજ્ઞઃ સાધુરુચ્યતે ॥ ૦૬-૧૭
પ્રત્યુત્થાનં ચ યુદ્ધં ચ સંવિભાગં ચ બન્ધુષુ ।
સ્વયમાક્રમ્ય ભુક્તં ચ શિક્ષેચ્ચત્વારિ કુક્કુટાત્ ॥ ૦૬-૧૮
ગૂઢમૈથુનચારિત્વં કાલે કાલે ચ સઙ્ગ્રહમ્ ।
અપ્રમત્તમવિશ્વાસં પઞ્ચ શિક્ષેચ્ચ વાયસાત્ ॥ ૦૬-૧૯
બહ્વાશી સ્વલ્પસન્તુષ્ટઃ સનિદ્રો લઘુચેતનઃ ।
સ્વામિભક્તશ્ચ શૂરશ્ચ ષડેતે શ્વાનતો ગુણાઃ ॥ ૦૬-૨૦
સુશ્રાન્તોऽપિ વહેદ્ભારં શીતોષ્ણં ન ચ પશ્યતિ ।
સન્તુષ્ટશ્ચરતે નિત્યં ત્રીણિ શિક્ષેચ્ચ ગર્દભાત્ ॥ ૦૬-૨૧
ય એતાન્વિંશતિગુણાનાચરિષ્યતિ માનવઃ ।
કાર્યાવસ્થાસુ સર્વાસુ અજેયઃ સ ભવિષ્યતિ ॥ ૦૬-૨૨

---

અર્થનાશં મનસ્તાપં ગૃહે દુશ્ચરિતાનિ ચ ।
વઞ્ચનં ચાપમાનં ચ મતિમાન્ન પ્રકાશયેત્ ॥ ૦૭-૦૧
ધનધાન્યપ્રયોગેષુ વિદ્યાસઙ્ગ્રહણે તથા ।
આહારે વ્યવહારે ચ ત્યક્તલજ્જઃ સુખી ભવેત્ ॥ ૦૭-૦૨
સન્તોષામૃતતૃપ્તાનાં યત્સુખં શાન્તિરેવ ચ ।
ન ચ તદ્ધનલુબ્ધાનામિતશ્ચેતશ્ચ ધાવતામ્ ॥ ૦૭-૦૩
સન્તોષસ્ત્રિષુ કર્તવ્યઃ સ્વદારે ભોજને ધને ।

ત્રિષુ ચૈવ ન કર્તવ્યોઽધ્યયને જપદાનયોઃ ॥ ૦૭-૦૪
વિપ્રયોર્વિપ્રવહ્ન્યોશ્ચ દમ્પત્યોઃ સ્વામિભૃત્યયોઃ ।
અન્તરેણ ન ગન્તવ્યં હલસ્ય વૃષભસ્ય ચ ॥ ૦૭-૦૫
પાદાભ્યાં ન સ્પૃશેદગ્નિં ગુરું બ્રાહ્મણમેવ ચ ।
નૈવ ગાં ન કુમારીં ચ ન વૃદ્ધં ન શિશું તથા ॥ ૦૭-૦૬
શકટં પઞ્ચહસ્તેન દશહસ્તેન વાજિનમ્ ।
ગજં હસ્તસહસ્રેણ દેશત્યાગેન દુર્જનમ્ ॥ ૦૭-૦૭
હસ્તી અઙ્કુશમાત્રેણ વાજી હસ્તેન તાડ્યતે ।
શ‌ૃઙ્ગી લગુડહસ્તેન ખડ્ગહસ્તેન દુર્જનઃ ॥ ૦૭-૦૮
તુષ્યન્તિ ભોજને વિપ્રા મયૂરા ઘનગર્જિતે ।
સાધવઃ પરસમ્પત્તૌ ખલાઃ પરવિપત્તિષુ ॥ ૦૭-૦૯
અનુલોમેન બલિનં પ્રતિલોમેન દુર્જનમ્ ।
આત્મતુલ્યબલં શત્રું વિનયેન બલેન વા ॥ ૦૭-૧૦
બાહુવીર્યં બલં રાજ્ઞાં બ્રહ્મણો બ્રહ્મવિદ્બલી ।
રૂપયૌવનમાધુર્યં સ્ત્રીણાં બલમનુત્તમમ્ ॥ ૦૭-૧૧
નાત્યન્તં સરલૈર્ભાવ્યં ગત્વા પશ્ય વનસ્થલીમ્ ।
છિદ્યન્તે સરલાસ્તત્ર કુબ્જાસ્તિષ્ઠન્તિ પાદપાઃ ॥ ૦૭-૧૨
યત્રોદકં તત્ર વસન્તિ હંસા-
    સ્તથૈવ શુષ્કં પરિવર્જયન્તિ ।
ન હંસતુલ્યેન નરેણ ભાવ્યં
    પુનસ્ત્યજન્તઃ પુનરાશ્રયન્તે ॥ ૦૭-૧૩
ઉપાર્જિતાનાં વિત્તાનાં ત્યાગ એવ હિ રક્ષણમ્ ।
તડાગોદરસંસ્થાનાં પરીવાહ ઇવામ્ભસામ્ ॥ ૦૭-૧૪
યસ્યાર્થાસ્તસ્ય મિત્રાણિ યસ્યાર્થાસ્તસ્ય બાન્ધવાઃ ।
યસ્યાર્થાઃ સ પુમાઁલ્લોકે યસ્યાર્થાઃ સ ચ પણ્ડિતઃ ॥ ૦૭-૧૫
સ્વર્ગસ્થિતાનામિહ જીવલોકે
    ચત્વારિ ચિહ્નાનિ વસન્તિ દેહે ।
દાનપ્રસંગો મધુરા ચ વાણી
    દેવાર્ચનં બ્રાહ્મણતર્પણં ચ ॥ ૦૭-૧૬
અત્યન્તકોપઃ કટુકા ચ વાણી
    દરિદ્રતા ચ સ્વજનેષુ વૈરમ્ ।
નીચપ્રસંગઃ કુલહીનસેવા

ચિહ્નાનિ દેહે નરકસ્થિતાનામ્ ॥ ૦૭-૧૭
ગમ્યતે યદિ મૃગેન્દ્રમન્દિરં
લભ્યતે કરિકપાલમૌક્તિકમ્ ।
જમ્બુકાલયગતે ચ પ્રાપ્યતે
વત્સપુચ્છખરચર્મખણ્ડનમ્ ॥ ૦૭-૧૮
શુનઃ પુચ્છમિવ વ્યર્થં જીવિતં વિદ્યયા વિના ।
ન ગુહ્યગોપને શક્તં ન ચ દંશનિવારણે ॥ ૦૭-૧૯
વાચાં શૌચં ચ મનસઃ શૌચમિન્દ્રિયનિગ્રહઃ ।
સર્વભૂતદયાશૌચમેતચ્છૌચં પરાર્થિનામ્ ॥ ૦૭-૨૦
પુષ્પે ગન્ધં તિલે તૈલં કાષ્ઠેઽગ્નિં પયસિ ઘૃતમ્ ।
ઇક્ષૌ ગુડં તથા દેહે પશ્યાત્માનં વિવેકતઃ ॥ ૦૭-૨૧

---

અધમા ધનમિચ્છન્તિ ધનમાનૌ ચ મધ્યમાઃ ।
ઉત્તમા માનમિચ્છન્તિ માનો હિ મહતાં ધનમ્ ॥ ૦૮-૦૧
ઇક્ષુરાપઃ પયો મૂલં તામ્બૂલં ફલમૌષધમ્ ।
ભક્ષયિત્વાપિ કર્તવ્યાઃ સ્નાનદાનાદિકાઃ ક્રિયાઃ ॥ ૦૮-૦૨
દીપો ભક્ષયતે ધ્વાન્તં કજ્જલં ચ પ્રસૂયતે ।
યદન્નં ભક્ષયતે નિત્યં જાયતે તાદૃશી પ્રજા ॥ ૦૮-૦૩
વિત્તં દેહિ ગુણાન્વિતેષુ મતિમન્નાન્યત્ર દેહિ ક્વચિત્
પ્રાપ્તં વારિનિધેર્જલં ઘનમુખે માધુર્યયુક્તં સદા ।
જીવાન્સ્થાવરજંગમાંશ્ચ સકલાન્સંજીવ્ય ભૂમણ્ડલં
ભૂયઃ પશ્ય તદેવ કોટિગુણિતં ગચ્છન્તમમ્ભોનિધિમ્ ॥ ૦૮-૦૪
ચાણ્ડાલાનાં સહસ્રૈશ્ચ સૂરિભિસ્તત્ત્વદર્શિભિઃ ।
એકો હિ યવનઃ પ્રોક્તો ન નીચો યવનાત્પરઃ ॥ ૦૮-૦૫
તૈલાભ્યઙ્ગે ચિતાધૂમે મૈથુને ક્ષૌરકર્મણિ ।
તાવદ્ભવતિ ચાણ્ડાલો યાવત્સ્નાનં ન ચાચરેત્ ॥ ૦૮-૦૬
અજીર્ણે ભેષજં વારિ જીર્ણે વારિ બલપ્રદમ્ ।
ભોજને ચામૃતં વારિ ભોજનાન્તે વિષાપહમ્ ॥ ૦૮-૦૭
હતં જ્ઞાનં ક્રિયાહીનં હતશ્ચાજ્ઞાનતો નરઃ ।
હતં નિર્ણાયકં સૈન્યં સ્ત્રિયો નષ્ટા હ્યભર્તૃકાઃ ॥ ૦૮-૦૮
વૃદ્ધકાલે મૃતા ભાર્યા બન્ધુહસ્તગતં ધનમ્ ।

ભોજનં ચ પરાધીનં તિસ્રઃ પુંસાં વિડમ્બનાઃ ॥ ૦૮-૦૯
નાગ્નિહોત્રં વિના વેદા ન ચ દાનં વિના ક્રિયા ।
ન ભાવેન વિના સિદ્ધિસ્તસ્માદ્ભાવો હિ કારણમ્ ॥ ૦૮-૧૦
ન દેવો વિદ્યતે કાષ્ઠે ન પાષાણે ન મૃણ્મયે ।
ભાવે હિ વિદ્યતે દેવસ્તસ્માદ્ભાવો હિ કારણમ્ ॥ ૦૮-૧૧
કાષ્ઠપાષાણધાતૂનાં કૃત્વા ભાવેન સેવનમ્ ।
શ્રદ્ધયા ચ તથા સિદ્ધિસ્તસ્ય વિષ્ણુપ્રસાદતઃ ॥ ૦૮-૧૨
શાન્તિતુલ્યં તપો નાસ્તિ ન સન્તોષાત્પરં સુખમ્ ।
ન તૃષ્ણાયાઃ પરો વ્યાધિર્ન ચ ધર્મો દયાપરઃ ॥ ૦૮-૧૩ (દયાસમઃ )
ક્રોધો વૈવસ્વતો રાજા તૃષ્ણા વૈતરણી નદી ।
વિદ્યા કામદુધા દેનુઃ સન્તોષો નન્દનં વનમ્ ॥ ૦૮-૧૪
ગુણો ભૂષયતે રૂપં શીલં ભૂષયતે કુલમ્ ।
સિધિર્ભૂષયતે વિદ્યાં ભોગો ભૂષયેતે ધનમ્ ॥ ૦૮-૧૫
નિર્ગુણસ્ય હતં રૂપં દુઃશીલસ્ય હતં કુલમ્ ।
અસિદ્ધસ્ય હતા વિદ્યા હ્યભોગેન હતં ધનમ્ ॥ ૦૮-૧૬
શુદ્ધં ભૂમિગતં તોયં શુદ્ધા નારી પતિવ્રતા ।
શુચિઃ ક્ષેમકરો રાજા સન્તોષો બ્રાહ્મણઃ શુચિઃ ॥ ૦૮-૧૭
અસન્તુષ્ટા દ્વિજા નષ્ટાઃ સન્તુષ્ટાશ્ચ મહીભૃતઃ ।
સલજ્જા ગણિકા નષ્ટા નિર્લજ્જાશ્ચ કુલાઙ્ગના ॥ ૦૮-૧૮
કિં કુલેન વિશાલેન વિદ્યાહીનેન દેહિનામ્ ।
દુષ્કુલં ચાપિ વિદુષો દેવૈરપિ સ પૂજ્યતે ॥ ૦૮-૧૯
વિદ્વાન્પ્રશસ્યતે લોકે વિદ્વાન્ સર્વત્ર પૂજ્યતે ।
વિદ્યયા લભતે સર્વં વિદ્યા સર્વત્ર પૂજ્યતે ॥ ૦૮-૨૦
ઋણકર્તા પિતા શત્રુર્માતા ચ વ્યભિચારિણી ।
ભાર્યા રૂપવતી શત્રુઃ પુત્રઃ શત્રુરપણ્ડિતઃ ॥ ૦૮-૨૧
માંસભક્ષ્યૈઃ સુરાપાનૈર્મુર્ખૈશ્ચાક્ષરવર્જિતૈઃ ।
પશુભિઃ પુરુષાકારૈર્ભારાક્રાન્તા હિ મેદિની ॥ ૦૮-૨૨
અન્નહીનો દહેદ્રાષ્ટ્રં મન્ત્રહીનશ્ચ ઋત્વિજઃ ।
યજમાનં દાનહીનો નાસ્તિ યજ્ઞસમો રિપુઃ ॥ ૦૮-૨૩

મુક્તિમિચ્છસિ ચેત્તાત વિષયાન્વિષવત્ત્યજ ।

ક્ષમાર્જવદયાશૌચં સત્યં પીયૂષવત્પિબ ॥ ૦૯-૦૧
પરસ્પરસ્ય મર્માણિ યે ભાષન્તે નરાધમાઃ ।
ત એવ વિલયં યાન્તિ વલ્મીકોદરસર્પવત્ ॥ ૦૯-૦૨
ગન્ધઃ સુવર્ણે ફલમિક્ષુદણ્ડે
    નાકરિ પુષ્પં ખલુ ચન્દનસ્ય ।
વિદ્વાન્ધનાઢ્યશ્ચ નૃપશ્ચિરાયુઃ
    ધાતુઃ પુરા કોઽપિ ન બુદ્ધિદોઽભૂત્ ॥ ૦૯-૦૩
સર્વૌષધીનામમૃતા પ્રધાના
    સર્વેષુ સૌખ્યેષ્વશનં પ્રધાનમ્ ।
સર્વેન્દ્રિયાણાં નયનં પ્રધાનં
    સર્વેષુ ગાત્રેષુ શિરઃ પ્રધાનમ્ ॥ ૦૯-૦૪
દૂતો ન સઞ્ચરતિ ખે ન ચલેચ્ચ વાર્તા
    પૂર્વં ન જલ્પિતમિદં ન ચ સઙ્ગમોઽસ્તિ ।
વ્યોમ્નિ સ્થિતં રવિશશિગ્રહણં પ્રશસ્તં
    જાનાતિ યો દ્વિજવરઃ સ કથં ન વિદ્વાન્ ॥ ૦૯-૦૫
વિદ્યાર્થી સેવકઃ પાન્થઃ ક્ષુધાર્તો ભયકાતરઃ ।
ભાણ્ડારી પ્રતિહારી ચ સપ્ત સુપ્તાન્પ્રબોધયેત્ ॥ ૦૯-૦૬
અહિં નૃપં ચ શાર્દૂલં વૃદ્ધં ચ બાલકં તથા ।
પરશ્વાનં ચ મૂર્ખં ચ સપ્ત સુપ્તાન્ન બોધયેત્ ॥ ૦૯-૦૭
અર્ધાધીતાશ્ચ યૈર્વેદાસ્તથા શૂદ્રાન્નભોજનાઃ ।
તે દ્વિજાઃ કિં કરિષ્યન્તિ નિર્વિષા ઇવ પન્નગાઃ ॥ ૦૯-૦૮
યસ્મિન્રુષ્ટે ભયં નાસ્તિ તુષ્ટે નૈવ ધનાગમઃ ।
નિગ્રહોઽનુગ્રહો નાસ્તિ સ રુષ્ટઃ કિં કરિષ્યતિ ॥ ૦૯-૦૯
નિર્વિષેણાપિ સર્પેણ કર્તવ્યા મહતી ફણા ।
વિષમસ્તુ ન ચાપ્યસ્તુ ઘટાટોપો ભયઙ્કરઃ ॥ ૦૯-૧૦
પ્રાતર્દ્યૂતપ્રસઙ્ગેન મધ્યાહ્ને સ્ત્રીપ્રસઙ્ગતઃ ।
રાત્રૌ ચૌરપ્રસઙ્ગેન કાલો ગચ્છન્તિ ધીમતામ્ ॥ ૦૯-૧૧
સ્વહસ્તગ્રથિતા માલા સ્વહસ્તઘૃષ્ટચન્દનમ્ ।
સ્વહસ્તલિખિતં સ્તોત્રં શક્રસ્યાપિ શ્રિયં હરેત્ ॥ ૦૯-૧૨
ઇક્ષુદણ્ડાસ્તિલાઃ શૂદ્રાઃ કાન્તા હેમ ચ મેદિની ।
ચન્દનં દધિ તામ્બૂલં મર્દનં ગુણવર્ધનમ્ ॥ ૦૯-૧૩
દહ્યમાનાઃ સુતીવ્રેણ નીચાઃ પરયશોઽગ્નિના

અશક્તાસ્તત્પદં ગન્તું તતો નિન્દાં પ્રકુર્વતે ।
દરિદ્રતા ધીરતયા વિરાજતેકુવસ્ત્રતા શુભ્રતયા વિરાજતે
કદન્નતા ચોષ્ણતયા વિરાજતે કુરૂપતા શીલતયા વિરાજતે ॥ ૦૯-૧૪

---

ધનહીનો ન હીનશ્ચ ધનિકઃ સ સુનિશ્ચયઃ ।
વિદ્યારત્નેન હીનો યઃ સ હીનઃ સર્વવસ્તુષુ ॥ ૧૦-૦૧
દૃષ્ટિપૂતં ન્યસેત્પાદં વસ્ત્રપૂતં પિબેજ્જલમ્ ।
શાસ્ત્રપૂતં વદેદ્વાક્યઃ મનઃપૂતં સમાચરેત્ ॥ ૧૦-૦૨
સુખાર્થી ચેત્ત્યજેદ્વિદ્યાં વિદ્યાર્થી ચેત્ત્યજેત્સુખમ્ ।
સુખાર્થિનઃ કુતો વિદ્યા સુખં વિદ્યાર્થિનઃ કુતઃ ॥ ૧૦-૦૩
કવયઃ કિં ન પશ્યન્તિ કિં ન ભક્ષન્તિ વાયસાઃ ।
મદ્યપાઃ કિં ન જલ્પન્તિ કિં ન કુર્વન્તિ યોષિતઃ ॥ ૧૦-૦૪
રઙ્કં કરોતિ રાજાનં રાજાનં રઙ્કમેવ ચ ।
ધનિનં નિર્ધનં ચૈવ નિર્ધનં ધનિનં વિધિઃ ॥ ૧૦-૦૫
લુબ્ધાનાં યાચકઃ શત્રુર્મૂર્ખાનાં બોધકો રિપુઃ ।
જારસ્ત્રીણાં પતિઃ શત્રુશ્ચૌરાણાં ચન્દ્રમા રિપુઃ ॥ ૧૦-૦૬
યેષાં ન વિદ્યા ન તપો ન દાનં
જ્ઞાનં ન શીલાં ન ગુણો ન ધર્મઃ ।
તે મર્ત્યલોકે ભુવિ ભારભૂતા
મનુષ્યરૂપેણ મૃગાશ્ચરન્તિ ॥ ૧૦-૦૭
અન્તઃસારવિહીનાનામુપદેશો ન જાયતે ।
મલયાચલસંસર્ગાન્ન વેણુશ્ચન્દનાયતે ॥ ૧૦-૦૮
યસ્ય નાસ્તિ સ્વયં પ્રજ્ઞા શાસ્ત્રં તસ્ય કરોતિ કિમ્ ।
લોચનાભ્યાં વિહીનસ્ય દર્પણઃ કિં કરિષ્યતિ ॥ ૧૦-૦૯
દુર્જનં સજ્જનં કર્તુમુપાયો નહિ ભૂતલે ।
અપાનં શાતધા ધૌતં ન શ્રેષ્ઠમિન્દ્રિયં ભવેત્ ॥ ૧૦-૧૦
આપ્તદ્વેષાદ્ભવેન્મૃત્યુઃ પરદ્વેષાદ્ધનક્ષયઃ ।
રાજદ્વેષાદ્ભવેન્નાશો બ્રહ્મદ્વેષાત્કુલક્ષયઃ ॥ ૧૦-૧૧
વરં વનં વ્યાઘ્રગજેન્દ્રસેવિતં
દ્રુમાલયં પત્રફલામ્બુસેવનમ્ ।
તૃણેષુ શય્યા શતજીર્ણવલ્કલં

न બન્ધુમધ્યે ધનહીનજીવનમ્ ॥ ૧૦-૧૨
વિપ્રો વૃક્ષસ્તસ્ય મૂલં ચ સન્ધ્યા
વેદઃ શાખા ધર્મકર્માણિ પત્રમ્ ।
તસ્માન્મૂલં યત્નતો રક્ષણીયં
છિન્ને મૂલે નૈવ શાખા ન પત્રમ્ ॥ ૧૦-૧૩
માતા ચ કમલા દેવી પિતા દેવો જનાર્દનઃ ।
બાન્ધવા વિષ્ણુભક્તાશ્ચ સ્વદેશો ભુવનત્રયમ્ ॥ ૧૦-૧૪
એકવૃક્ષસમારૂઢા નાનાવર્ણા વિહઙ્ગમાઃ ।
પ્રભાતે દિક્ષુ દશસુ યાન્તિ કા તત્ર વેદના ॥ ૧૦-૧૫
બુદ્ધિર્યસ્ય બલં તસ્ય નિર્બુદ્ધેશ્ચ કુતો બલમ્ ।
વને સિંહો યદોન્મત્તઃ મશકેન નિપાતિતઃ ॥ ૧૦-૧૬
કા ચિન્તા મમ જીવને યદિ હરિર્વિશ્વમ્ભરો ગીયતે
નો ચેદર્ભકજીવનાય જનનીસ્તન્યં કથં નિર્મમે ।
ઇત્યાલોચ્ય મુહુર્મુહુર્યદુપતે લક્ષ્મીપતે કેવલં
ત્વત્પાદામ્બુજસેવનેન સતતં કાલો મયા નીયતે ॥ ૧૦-૧૭
ગીર્વાણવાણીષુ વિશિષ્ટબુદ્ધિ-
સ્તથાપિ ભાષાન્તરલોલુપોઽહમ્ ।
યથા સુધાયામમરેષુ સત્યાં
સ્વર્ગાઙ્ગનાનામધરાસવે રુચિઃ ॥ ૧૦-૧૮
અન્નાદ્દશગુણં પિષ્ટં પિષ્ટાદ્દશગુણં પયઃ ।
પયસોઽષ્ટગુણં માંસાં માંસાદ્દશગુણં ઘૃતમ્ ॥ ૧૦-૧૯
શોકેન રોગા વર્ધન્તે પયસા વર્ધતે તનુઃ ।
ઘૃતેન વર્ધતે વીર્યં માંસાન્માંસં પ્રવર્ધતે ॥ ૧૦-૨૦

---

દાતૃત્વં પ્રિયવક્તૃત્વં ધીરત્વમુચિતજ્ઞતા ।
અભ્યાસેન ન લભ્યન્તે ચત્વારઃ સહજા ગુણાઃ ॥ ૧૧-૦૧
આત્મવર્ગં પરિત્યજ્ય પરવર્ગં સમાશ્રયેત્ ।
સ્વયમેવ લયં યાતિ યથા રાજાન્યધર્મતઃ ॥ ૧૧-૦૨
હસ્તી સ્થૂલતનુઃ સ ચાઙ્કુશવશઃ કિં હસ્તિમાત્રોઽઙ્કુશો
દીપે પ્રજ્વલિતે પ્રણશ્યતિ તમઃ કિં દીપમાત્રં તમઃ ।
વજ્રેણાપિ હતાઃ પતન્તિ ગિરયઃ કિં વજ્રમાત્રં નગા-

સ્તેજો યસ્ય વિરાજતે સ બલવાન્સ્થૂલેષુ કઃ પ્રત્યયઃ ॥ ૧૧-૦૩
કલૌ દશસહસ્રાણિ હરિસ્ત્યજતિ મેદિનીમ્ ।
તદર્ધં જાહ્નવીતોયં તદર્ધં ગ્રામદેવતાઃ ॥ ૧૧-૦૪
ગૃહાસક્તસ્ય નો વિદ્યા નો દયા માંસભોજિનઃ ।
દ્રવ્યલુબ્ધસ્ય નો સત્યં સ્ત્રૈણસ્ય ન પવિત્રતા ॥ ૧૧-૦૫
ન દુર્જનઃ સાધુદશામુપૈતિ
બહુપ્રકારૈરપિ શિક્ષ્યમાણઃ ।
આમૂલસિક્તઃ પયસા ઘૃતેન
ન નિમ્બવૃક્ષો મધુરત્વમેતિ ॥ ૧૧-૦૬
અન્તર્ગતમલો દુષ્ટસ્તીર્થસ્નાનશતૈરપિ ।
ન શુધ્યતિ યથા ભાણ્ડં સુરાયા દાહિતં ચ સત્ ॥ ૧૧-૦૭
ન વેત્તિ યો યસ્ય ગુણપ્રકર્ષં
સ તં સદા નિન્દતિ નાત્ર ચિત્રમ્ ।
યથા કિરાતી કરિકુમ્ભલબ્ધાં
મુક્તાં પરિત્યજ્ય બિભર્તિ ગુઞ્જામ્ ॥ ૧૧-૦૮
યે તુ સંવત્સરં પૂર્ણં નિત્યં મૌનેન ભુઞ્જતે ।
યુગકોટિસહસ્રં તૈઃ સ્વર્ગલોકે મહીયતે ॥ ૧૧-૦૯
કામક્રોધૌ તથા લોભં સ્વાદુશ‍ૃઙ્ગારકૌતુકે ।
અતિનિદ્રાતિસેવે ચ વિદ્યાર્થી હ્યષ્ટ વર્જયેત્ ॥ ૧૧-૧૦
અકૃષ્ટફલમૂલાનિ વનવાસરતિઃ સદા ।
કુરુતેઽહરહઃ શ્રાદ્ધમૃષિર્વિપ્રઃ સ ઉચ્યતે ॥ ૧૧-૧૧
એકાહારેણ સન્તુષ્ટઃ ષટ્કર્મનિરતઃ સદા ।
ઋતુકાલાભિગામી ચ સ વિપ્રો દ્વિજ ઉચ્યતે ॥ ૧૧-૧૨
લૌકિકે કર્મણિ રતઃ પશૂનાં પરિપાલકઃ ।
વાણિજ્યકૃષિકર્મા યઃ સ વિપ્રો વૈશ્ય ઉચ્યતે ॥ ૧૧-૧૩
લાક્ષાદિતૈલનીલીનાં કૌસુમ્ભમધુસર્પિષામ્ ।
વિક્રેતા મદ્યમાંસાનાં સ વિપ્રઃ શૂદ્ર ઉચ્યતે ॥ ૧૧-૧૪
પરકાર્યવિહન્તા ચ દામ્ભિકઃ સ્વાર્થસાધકઃ ।
છલી દ્વેષી મૃદુઃ ક્રૂરો વિપ્રો માર્જાર ઉચ્યતે ॥ ૧૧-૧૫
વાપીકૂપતડાગાનામારામસુરવેશ્મનામ્ ।
ઉચ્છેદને નિરાશઙ્કઃ સ વિપ્રો મ્લેચ્છ ઉચ્યતે ॥ ૧૧-૧૬
દેવદ્રવ્યં ગુરુદ્રવ્યં પરદારાભિમર્શનમ્ ।

નિર્વાહઃ સર્વભૂતેષુ વિપ્રશ્ચાણ્ડાલ ઉચ્યતે ॥ ૧૧-૧૭
દેયં ભોજ્યધનં ધનં સુકૃતિભિર્નો સઞ્ચયસ્તસ્ય વૈ
    શ્રીકર્ણસ્ય બલેશ્ચ વિક્રમપતેરદ્યાપિ કીર્તિઃ સ્થિતા ।
અસ્માકં મધુદાનભોગરહિતં નાથં ચિરાત્સંચિતં
    નિર્વાણાદિતિ નૈજપાદયુગલં ધર્ષન્ત્યહો મક્ષિકાઃ ॥ ૧૧-૧૮

---

સાનન્દં સદનં સુતાસ્તુ સુધિયઃ કાન્તા પ્રિયાલાપિની
    ઇચ્છાપૂર્તિધનં સ્વયોષિતિ રતિઃ સ્વાજ્ઞાપરાઃ સેવકાઃ ।
આતિથ્યં શિવપૂજનં પ્રતિદિનં મિષ્ટાન્નપાનં ગૃહે
    સાધોઃ સંગમુપાસતે ચ સતતં ધન્યો ગૃહસ્થાશ્રમઃ ॥ ૧૨-૦૧
આર્તેષુ વિપ્રેષુ દયાન્વિતશ્ચ
    યચ્છ્રદ્ધયા સ્વલ્પમુપૈતિ દાનમ્ ।
અનન્તપારમુપૈતિ  રાજન્
    યદ્દીયતે તન્ન લભેદ્દ્વિજેભ્યઃ ॥ ૧૨-૦૨
દાક્ષિણ્યં સ્વજને દયા પરજને શાઠ્યં સદા દુર્જને
    પ્રીતિઃ સાધુજને સ્મયઃ ખલજને વિદ્વજ્જને ચાર્જવમ્ ।
શૌર્યં શત્રુજને ક્ષમા ગુરુજને નારીજને ધૂર્તતા
    ઇત્થં યે પુરુષા કલાસુ કુશલાસ્તેષ્વેવ લોકસ્થિતિઃ ॥ ૧૨-૦૩
હસ્તૌ દાનવિવર્જિતૌ શ્રુતિપુટૌ સારસ્વતદ્રોહિણૌ
    નેત્રે સાધુવિલોકનેન રહિતે પાદૌ ન તીર્થં ગતૌ ।
અન્યાયાર્જિતવિત્તપૂર્ણમુદરં ગર્વેણ તુઙ્ગં શિરો
    રે રે જમ્બુક મુઞ્ચ મુઞ્ચ સહસા નીચં સુનિન્દ્યં વપુઃ ॥ ૧૨-૦૪
યેષાં શ્રીમદ્યશોદાસુતપદકમલે નાસ્તિ ભક્તિર્નરાણાં
    યેષામાભીરકન્યાપ્રિયગુણકથને નાનુરક્તા રસજ્ઞા ।
યેષાં શ્રીકૃષ્ણલીલાલલિતરસકથાસાદરૌ નૈવ કર્ણૌ
    ધિક્ તાન્ ધિક્ તાન્ ધિગેતાન્ કથયતિ સતતં કીર્તનસ્થો મૃદંગઃ ॥ ૧૨-૦૫
પત્રં નૈવ યદા કરીલવિટપે દોષો વસન્તસ્ય કિં
    નોલૂકોઽપ્યવલોકતે યદિ દિવા સૂર્યસ્ય કિં દૂષણમ્ ।
વર્ષા નૈવ પતન્તિ ચાતકમુખે મેઘસ્ય કિં દૂષણં
    યત્પૂર્વં વિધિના લલાટલિખિતં તન્માર્જિતું કઃ ક્ષમઃ ॥ ૧૨-૦૬
સત્સઙ્ગાદ્ભવતિ હિ સાધુના ખલાનાં

સાધૂનાં ન હિ ખલસંગતઃ ખલત્વમ્ ।
આમોદં કુસુમભવં મૃદેવ ધત્તે
મૃદ્ગન્ધં નહિ કુસુમાનિ ધારયન્તિ ॥ ૧૨-૦૭
સાધૂનાં દર્શનં પુણ્યં તીર્થભૂતા હિ સાધવઃ ।
કાલેન ફલતે તીર્થં સદ્યઃ સાધુસમાગમઃ ॥ ૧૨-૦૮
વિપ્રાસ્મિન્નગરે મહાન્કથય કસ્તાલદ્રુમાણાં ગણઃ
કો દાતા રજકો દદાતિ વસનં પ્રાતર્ગૃહીત્વા નિશિ ।
કો દક્ષઃ પરવિત્તદારહરણે સર્વોઽપિ દક્ષો જનઃ
કસ્માજ્જીવસિ હે સખે વિષકૃમિન્યાયેન જીવામ્યહમ્ ॥ ૧૨-૦૯
ન વિપ્રપાદોદકકર્દમાણિ
ન વેદશાસ્ત્રધ્વનિગર્જિતાનિ ।
સ્વાહાસ્વધાકારવિવર્જિતાનિ
શ્મશાનતુલ્યાનિ ગૃહાણિ તાનિ ॥ ૧૨-૧૦
સત્યં માતા પિતા જ્ઞાનં ધર્મો ભ્રાતા દયા સખા ।
શાન્તિઃ પત્ની ક્ષમા પુત્રઃ ષડેતે મમ બાન્ધવાઃ ॥ ૧૨-૧૧
અનિત્યાનિ શરીરાણિ વિભવો નૈવ શાશ્વતઃ ।
નિત્યં સંનિહિતો મૃત્યુઃ કર્તવ્યો ધર્મસઙ્ગ્રહઃ ॥ ૧૨-૧૨
નિમન્ત્રોત્સવા વિપ્રા ગાવો નવતૃણોત્સવાઃ ।
પત્યુત્સાહયુતા ભાર્યા અહં કૃષ્ણચરણોત્સવઃ ॥ ૧૨-૧૩
માતૃવત્પરદારેષુ પરદ્રવ્યેષુ લોષ્ટ્રવત્ ।
આત્મવત્સર્વભૂતેષુ યઃ પશ્યતિ સ પણ્ડિતઃ ॥ ૧૨-૧૪
ધર્મે તત્પરતા મુખે મધુરતા દાને સમુત્સાહતા
મિત્રેઽવઞ્ચકતા ગુરૌ વિનયતા ચિત્તેઽતિમભીરતા ।
આચારે શુચિતા ગુણે રસિકતા શાસ્ત્રેષુ વિજ્ઞાનતા
રૂપે સુન્દરતા શિવે ભજનતા ત્વય્યસ્તિ ભો રાઘવ ॥ ૧૨-૧૫
કાષ્ઠં કલ્પતરુઃ સુમેરુરચલશ્ચિન્તામણિઃ પ્રસ્તરઃ
સૂર્યસ્તીવ્રકરઃ શશી ક્ષયકરઃ ક્ષારો હિ વારાં નિધિઃ ।
કામો નષ્ટતનુર્વલિર્દિતિસુતો નિત્યં પશુઃ કામગૌ-
ર્નૈતાંસ્તે તુલયામિ ભો રઘુપતે કસ્યોપમા દીયતે ॥ ૧૨-૧૬
વિદ્યા મિત્રં પ્રવાસે ચ ભાર્યા મિત્રં ગૃહેષુ ચ ।
વ્યાધિતસ્યૌષધં મિત્રં ધર્મો મિત્રં મૃતસ્ય ચ ॥ ૧૨-૧૭
વિનયં રાજપુત્રેભ્યઃ પણ્ડિતેભ્યઃ સુભાષિતમ્ ।

અનૃતં ધૂતકારેભ્યઃ સ્ત્રીભ્યઃ શિક્ષેત કૈતવમ્ ॥ ૧૨-૧૮
અનાલોક્ય વ્યયં કર્તા અનાથઃ કલહપ્રિયઃ ।
આતુરઃ સર્વક્ષેત્રેષુ નરઃ શીઘ્રં વિનશ્યતિ ॥ ૧૨-૧૯
નાહારં ચિન્તયેત્પ્રાજ્ઞો ધર્મમેકં હિ ચિન્તયેત્ ।
આહારો હિ મનુષ્યાણાં જન્મના સહ જાયતે ॥ ૧૨-૨૦
ધનધાન્યપ્રયોગેષુ વિદ્યાસઙ્ગ્રહણે તથા ।
આહારે વ્યવહારે ચ ત્યક્તલજ્જઃ સુખી ભવેત્ ॥ ૧૨-૨૧
જલબિન્દુનિપાતેન ક્રમશઃ પૂર્યતે ઘટઃ ।
સ હેતુઃ સર્વવિદ્યાનાં ધર્મસ્ય ચ ધનસ્ય ચ ॥ ૧૨-૨૨
વયસઃ પરિણામેઽપિ યઃ ખલઃ ખલ એવ સઃ ।
સમ્પક્વમપિ માધુર્યં નોપયાતીન્દ્રવારુણમ્ ॥ ૧૨-૨૩

---

મુહૂર્તમપિ જીવેચ્ચ નરઃ શુક્લેન કર્મણા ।
ન કલ્પમપિ કષ્ટેન લોકદ્વયવિરોધિના ॥ ૧૩-૦૧
ગતે શોકો ન કર્તવ્યો ભવિષ્યં નૈવ ચિન્તયેત્ ।
વર્તમાનેન કાલેન વર્તયન્તિ વિચક્ષણાઃ ॥ ૧૩-૦૨
સ્વભાવેન હિ તુષ્યન્તિ દેવાઃ સત્પુરુષાઃ પિતા ।
જ્ઞાતયઃ સ્નાનપાનાભ્યાં વાક્યદાનેન પણ્ડિતાઃ ॥ ૧૩-૦૩
આયુઃ કર્મ ચ વિત્તં ચ વિદ્યા નિધનમેવ ચ ।
પઞ્ચૈતાનિ હિ સૃજ્યન્તે ગર્ભસ્થસ્યૈવ દેહિનઃ ॥ ૧૩-૦૪ (4.1)
અહો બત વિચિત્રાણિ ચરિતાનિ મહાત્મનામ્ ।
લક્ષ્મીં તૃણાય મન્યન્તે તદ્ભારેણ નમન્તિ ચ ॥ ૧૩-૦૫
યસ્ય સ્નેહો ભયં તસ્ય સ્નેહો દુઃખસ્ય ભાજનમ્ ।
સ્નેહમૂલાનિ દુઃખાનિ તાનિ ત્યક્ત્વા વસેત્ સુખમ્ ॥ ૧૩-૦૬
અનાગતવિધાતા ચ પ્રત્યુત્પન્નમતિસ્તથા ।
દ્વાવેતૌ સુખમેધેતે યદ્ભવિષ્યો વિનશ્યતિ ॥ ૧૩-૦૭
રાજ્ઞિ ધર્મિણિ ધર્મિષ્ઠાઃ પાપે પાપાઃ સમે સમાઃ ।
રાજાનમનુવર્તન્તે યથા રાજા તથા પ્રજાઃ ॥ ૧૩-૦૮
જીવન્તં મૃતવન્મન્યે દેહિનં ધર્મવર્જિતમ્ ।
મૃતો ધર્મેણ સંયુક્તો દીર્ઘજીવી ન સંશયઃ ॥ ૧૩-૦૯
ધર્માર્થકામમોક્ષાણાં યસ્યૈકોઽપિ ન વિદ્યતે ।

અજાગલસ્તનસ્યેવ તસ્ય જન્મ નિરર્થકમ્ ॥ ૧૩-૧૦
બન્ધાય વિષયાસઙ્ગો મુક્ત્યૈ નિર્વિષયં મનઃ ।
મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ॥ ૧૩-૧૨
દેહાભિમાને ગલિતં જ્ઞાનેન પરમાત્મનિ ।
યત્ર યત્ર મનો યાતિ તત્ર તત્ર સમાધયઃ ॥ ૧૩-૧૩
ઈપ્સિતં મનસઃ સર્વં કસ્ય સમ્પદ્યતે સુખમ્ ।
દૈવાયત્તં યતઃ સર્વં તસ્માત્સન્તોષમાશ્રયેત્ ॥ ૧૩-૧૪
યથા ધેનુસહસ્રેષુ વત્સો ગચ્છતિ માતરમ્ ।
તથા યચ્ચ કૃતં કર્મ કર્તારમનુગચ્છતિ ॥ ૧૩-૧૫
અનવસ્થિતકાર્યસ્ય ન જને ન વને સુખમ્ ।
જનો દહતિ સંસર્ગાદ્વનં સંગવિવર્જનાત્ ॥ ૧૩-૧૬
ખનિત્વા હિ ખનિત્રેણ ભૂતલે વારિ વિન્દતિ ।
તથા ગુરુગતાં વિદ્યાં શુશ્રૂષુરધિગચ્છતિ ॥ ૧૩-૧૭
કર્માયત્તં ફલં પુંસાં બુદ્ધિઃ કર્માનુસારિણી ।
તથાપિ સુધિયશ્ચાર્યા સુવિચાર્યૈવ કુર્વતે ॥ ૧૩-૧૮
સન્તોષસ્ત્રિષુ કર્તવ્યઃ સ્વદારે ભોજને ધને ।
ત્રિષુ ચૈવ ન કર્તવ્યોઽધ્યયને જપદાનયોઃ ॥ ૧૩-૧૯
એકાક્ષરપ્રદાતારં યો ગુરું નાભિવન્દતે ।
શ્વાનયોનિશતં ગત્વા ચાણ્ડાલેષ્વભિજાયતે ॥ ૧૩-૨૦
યુગાન્તે પ્રચલેન્મેરુઃ કલ્પાન્તે સપ્ત સાગરાઃ ।
સાધવઃ પ્રતિપન્નાર્થાન્ન ચલન્તિ કદાચન ॥ ૧૩-૨૧

---

પૃથિવ્યાં ત્રીણિ રત્નાનિ જલમન્નં સુભાષિતમ્ ।
મૂઢૈઃ પાષાણખણ્ડેષુ રત્નસંજ્ઞા વિધીયતે ॥ ૧૪-૦૧
આત્માપરાધવૃક્ષસ્ય ફલાન્યેતાનિ દેહિનામ્ ।
દારિદ્ર્યદુઃખરોગાણિ બન્ધનવ્યસનાનિ ચ ॥ ૧૪-૦૨
પુનર્વિત્તં પુનર્મિત્રં પુનર્ભાર્યા પુનર્મહી ।
એતત્સર્વં પુનર્લભ્યં ન શરીરં પુનઃ પુનઃ ॥ ૧૪-૦૩
બહૂનાં ચૈવ સત્ત્વાનાં સમવાયો રિપુઞ્જયઃ ।
વર્ષાધારાધરો મેઘસ્તૃણૈરપિ નિવાર્યતે ॥ ૧૪-૦૪
જલે તૈલં ખલે ગુહ્યં પાત્રે દાનં મનાગપિ ।

પ્રાજ્ઞે શાસ્ત્રં સ્વયં યાતિ વિસ્તારં વસ્તુશક્તિતઃ ॥ ૧૪-૦૫
ધર્માખ્યાને શ્મશાને ચ રોગિણાં યા મતિર્ભવેત્ ।
સા સર્વદૈવ તિષ્ઠેચ્ચેત્કો ન મુચ્યેત બન્ધનાત્ ॥ ૧૪-૦૬
ઉત્પન્નપશ્ચાત્તાપસ્ય બુદ્ધિર્ભવતિ યાદૃશી ।
તાદૃશી યદિ પૂર્વં સ્યાત્કસ્ય ન સ્યાન્મહોદયઃ ॥ ૧૪-૦૭
દાને તપસિ શૌર્યે વા વિજ્ઞાને વિનયે નયે ।
વિસ્મયો નહિ કર્તવ્યો બહુરત્ના વસુન્ધરા ॥ ૧૪-૦૮
દૂરસ્થોઽપિ ન દૂરસ્થો યો યસ્ય મનસિ સ્થિતઃ ।
યો યસ્ય હૃદયે નાસ્તિ સમીપસ્થોઽપિ દૂરતઃ ॥ ૧૪-૦૯
યસ્માચ્ચ પ્રિયમિચ્છેત્તુ તસ્ય બ્રૂયાત્સદા પ્રિયમ્ ।
વ્યાધો મૃગવધં કર્તું ગીતં ગાયતિ સુસ્વરમ્ ॥ ૧૪-૧૦
અત્યાસન્ના વિનાશાય દૂરસ્થા ન ફલપ્રદા ।
સેવ્યતાં મધ્યભાવેન રાજા વહ્નિર્ગુરુઃ સ્ત્રિયઃ ॥ ૧૪-૧૧
અગ્નિરાપઃ સ્ત્રિયો મૂર્ખાઃ સર્પા રાજકુલાનિ ચ ।
નિત્યં યત્નેન સેવ્યાનિ સદ્યઃ પ્રાણહરાણિ ષટ્ ॥ ૧૪-૧૨
સ જીવતિ ગુણા યસ્ય યસ્ય ધર્મઃ સ જીવતિ ।
ગુણધર્મવિહીનસ્ય જીવિતં નિષ્પ્રયોજનમ્ ॥ ૧૪-૧૩
યદીચ્છસિ વશીકર્તું જગદેકેન કર્મણા ।
પુરા પઞ્ચદશાસ્યેભ્યો ગાં ચરન્તી નિવારય ॥ ૧૪-૧૪
પ્રસ્તાવસદૃશં વાક્યં પ્રભાવસદૃશં પ્રિયમ્ ।
આત્મશક્તિસમં કોપં યો જાનાતિ સ પણ્ડિતઃ ॥ ૧૪-૧૫
એક એવ પદાર્થસ્તુ ત્રિધા ભવતિ વીક્ષિતઃ ।
કુણપં કામિની માંસં યોગિભિઃ કામિભિઃ શ્વભિઃ ॥ ૧૪-૧૬
સુસિદ્ધમૌષધં ધર્મં ગૃહચ્છિદ્રં ચ મૈથુનમ્ ।
કુભુક્તં કુશ્રુતં ચૈવ મતિમાન્ન પ્રકાશયેત્ ॥ ૧૪-૧૭
તાવન્મૌનેન નીયન્તે કોકિલૈશ્ચૈવ વાસરાઃ ।
યાવત્સર્વજનાનન્દદાયિની વાક્પ્રવર્તતે ॥ ૧૪-૧૮
ધર્મં ધનં ચ ધાન્યં ચ ગુરોર્વચનમૌષધમ્ ।
સુગૃહીતં ચ કર્તવ્યમન્યથા તુ ન જીવતિ ॥ ૧૪-૧૯
ત્યજ દુર્જનસંસર્ગં ભજ સાધુસમાગમમ્ ।
કુરુ પુણ્યમહોરાત્રં સ્મર નિત્યમનિત્યતઃ ॥ ૧૪-૨૦

યસ્ય ચિત્તં દ્રવીભૂતં કૃપયા સર્વજન્તુષુ ।
તસ્ય જ્ઞાનેન મોક્ષેણ કિં જટાભસ્મલેપનૈઃ ॥ ૧૫-૦૧
એકમપ્યક્ષરં યસ્તુ ગુરુઃ શિષ્યં પ્રબોધયેત્ ।
પૃથિવ્યાં નાસ્તિ તદ્દ્રવ્યં યદ્દત્વા સોઽનૃણી ભવેત્ ॥ ૧૫-૦૨
ખલાનાં કણ્ટકાનાં ચ દ્વિવિધૈવ પ્રતિક્રિયા ।
ઉપાનન્મુખભઙ્ગો વા દૂરતો વા વિસર્જનમ્ ॥ ૧૫-૦૨
કુચૈલિનં દન્તમલોપધારિણં
 બહ્વાશિનં નિષ્ઠુરભાષિણં ચ ।
સૂર્યોદયે ચાસ્તમિતે શયાનં
 વિમુઞ્ચતિ શ્રીર્યદિ ચક્રપાણિઃ ॥ ૧૫-૦૪
ત્યજન્તિ મિત્રાણિ ધનૈર્વિહીનં
 પુત્રાશ્ચ દારાશ્ચ સુહૃજ્જનાશ્ચ ।
તમર્થવન્તં પુનરાશ્રયન્તિ
 અર્થો હિ લોકે મનુષ્યસ્ય બન્ધુઃ ॥ ૧૫-૦૫
અન્યાયોપાર્જિતં દ્રવ્યં દશ વર્ષાણિ તિષ્ઠતિ ।
પ્રાપ્તે ચૈકાદશે વર્ષે સમૂલં તદ્વિનશ્યતિ ॥ ૧૫-૦૬
અયુક્તં સ્વામિનો યુક્તં યુક્તં નીચસ્ય દૂષણમ્ ।
અમૃતં રાહવે મૃત્યુર્વિષં શઙ્કરભૂષણમ્ ॥ ૧૫-૦૭
તદ્ભોજનં યદ્વિજભુક્તશેષં
 તત્સૌહૃદં યત્ક્રિયતે પરસ્મિન્ ।
સા પ્રાજ્ઞતા યા ન કરોતિ પાપં
 દમ્ભં વિના યઃ ક્રિયતે સ ધર્મઃ ॥ ૧૫-૦૮
મણિર્લુણ્ઠતિ પાદાગ્રે કાચઃ શિરસિ ધાર્યતે ।
ક્રયવિક્રયવેલાયાં કાચઃ કાચો મણિર્મણિઃ ॥ ૧૫-૦૯
અનન્તશાસ્ત્રં બહુલાશ્ચ વિદ્યાઃ
 સ્વલ્પશ્ચ કાલો બહુવિઘ્નતા ચ ।
યત્સારભૂતં તદુપાસનીયાં
 હંસો યથા ક્ષીરમિવામ્બુમધ્યાત્ ॥ ૧૫-૧૦
દૂરાગતં પથિ શ્રાન્તં વૃથા ચ ગૃહમાગતમ્ ।
અનર્ચયિત્વા યો ભુઙ્ક્તે સ વૈ ચાણ્ડાલ ઉચ્યતે ॥ ૧૫-૧૧
પઠન્તિ ચતુરો વેદાન્ધર્મશાસ્ત્રાણ્યનેકશઃ ।

આત્માનં નૈવ જાનન્તિ દર્વી પાકરસં યથા ॥ ૧૫-૧૨
ધન્યા દ્વિજમયી નૌકા વિપરીતા ભવાર્ણવે ।
તરન્ત્યધોગતાઃ સર્વે ઉપરિષ્ઠાઃ પતન્ત્યધઃ ॥ ૧૫-૧૩
અયમમૃતનિધાનં નાયકોઽપ્યોષધીનામ્
 અમૃતમયશરીરઃ કાન્તિયુક્તોઽપિ ચન્દ્રઃ ।
ભવતિવિગતરશ્મિર્મણ્ડલં પ્રાપ્ય ભાનોઃ
 પરસદનનિવિષ્ટઃ કો લઘુત્વં ન યાતિ ॥ ૧૫-૧૪
અલિરયં નલિનીદલમધ્યગઃ
 કમલિનીમકરન્દમદાલસઃ ।
વિધિવશાત્પરદેશમુપાગતઃ
 કુટજપુષ્પરસં બહુ મન્યતે ॥ ૧૫-૧૫
પીતઃ ક્રુદ્ધેન તાતશ્ચરણતલહતો વલ્લભો યેન રોષા
 દાબાલ્યાદ્વિપ્રવર્યૈઃ સ્વવદનવિવરે ધાર્યતે વૈરિણી મે ।
ગેહં મે છેદયન્તિ પ્રતિદિવસમુમાકાન્તપૂજાનિમિત્તં
 તસ્માત્ખિન્ના સદાહં દ્વિજકુલનિલયં નાથ યુક્તં ત્યજામિ ॥ ૧૫-૧૬
બન્ધનાનિ ખલુ સન્તિ બહૂનિ
 પ્રેમરજ્જુકૃતબન્ધનમન્યત્ ।
દારુભેદનિપુણોઽપિ ષડંઘ્રિ-
 ર્નિષ્ક્રિયો ભવતિ પંકજકોશેઃ ॥ ૧૫-૧૭
છિન્નોઽપિ ચન્દનતરુર્ન જહાતિ ગન્ધં
 વૃદ્ધોઽપિ વારણપતિર્ન જહાતિ લીલામ્ ।
યન્ત્રાર્પિતો મધુરતાં ન જહાતિ ચેક્ષુઃ
 ક્ષીણોઽપિ ન ત્યજતિ શીલગુણાન્કુલીનઃ ॥ ૧૫-૧૮
ઉર્વ્યાં કોઽપિ મહીધરો લઘુતરો દોર્ભ્યાં ધૃતો
 લીલયા તેન ત્વં દિવિ ભૂતલે ચ સતતં ગોવર્ધનો ગીયસે ।
ત્વાં ત્રૈલોક્યધરં વહામિ કુચયોરગ્રે ન તદ્ગણ્યતે
 કિં વા કેશવ ભાષણેન બહુના પુણ્યૈર્યશો લભ્યતે ॥ ૧૫-૧૯

---

ન ધ્યાતં પદમીશ્વરસ્ય વિધિવત્સંસારવિચ્છિત્તયે
 સ્વર્ગદ્વારકપાટપાટનપટુર્ધર્મોઽપિ નોપાર્જિતઃ ।
નારીપીનપયોધરોરુયુગલા સ્વપ્નેઽપિ નાલિંગિતં

માતુઃ કેવલમેવ યૌવનવનચ્છેદે કુઠારા વયમ્ ॥ ૧૬-૦૧
જલ્પન્તિ સાર્ધમન્યેન પશ્યન્ત્યન્યં સવિભ્રમાઃ ।
હૃદયે ચિન્તયન્ત્યન્યં ન સ્ત્રીણામેકતો રતિઃ ॥ ૧૬-૦૨
યો મોહાન્મન્યતે મૂઢો રક્તેયં મયિ કામિની ।
સ તસ્યા વશગો ભૂત્વા નૃત્યેત્ ક્રીડાશકુન્તવત્ ॥ ૧૬-૦૩
કોઽર્થાન્પ્રાપ્ય ન ગર્વિતો વિષયિણઃ કસ્યાપદોઽસ્તં ગતાઃ
સ્ત્રીભિઃ કસ્ય ન ખણ્ડિતં ભુવિ મનઃ કો નામ રાજપ્રિયઃ ।
કઃ કાલસ્ય ન ગોચરત્વમગમત્ કોઽર્થી ગતો ગૌરવં
કો વા દુર્જનદુર્ગમેષુ પતિતઃ ક્ષેમેણ યાતઃ પથિ ॥ ૧૬-૦૪
ન નિર્મિતો ન ચૈવ ન દૃષ્ટપૂર્વો
ન શ્રૂયતે હેમમયઃ કુરંગઃ ।
તથાઽપિ તૃષ્ણા રઘુનન્દનસ્ય
વિનાશકાલે વિપરીતબુદ્ધિઃ ॥ ૧૬-૦૫
ગુણૈરુત્તમતાં યાતિ નોચ્ચૈરાસનસંસ્થિતાઃ ।
પ્રાસાદશિખરસ્થોઽપિ કાકઃ કિં ગરુડાયતે ॥ ૧૬-૦૬
ગુણાઃ સર્વત્ર પૂજ્યન્તે ન મહત્યોઽપિ સમ્પદઃ ।
પૂર્ણેન્દુઃ કિં તથા વન્દ્યો નિષ્કલઙ્કો યથા કૃશઃ ॥ ૧૬-૦૭
પરૈરુક્તગુણો યસ્તુ નિર્ગુણોઽપિ ગુણી ભવેત્ ।
ઇન્દ્રોઽપિ લઘુતાં યાતિ સ્વયં પ્રખ્યાપિતૈર્ગુણૈઃ ॥ ૧૬-૦૮
વિવેકિનમનુપ્રાપ્તા ગુણા યાન્તિ મનોજ્ઞતામ્ ।
સુતરાં રત્નમાભાતિ ચામીકરનિયોજિતમ્ ॥ ૧૬-૦૯
ગુણૈઃ સર્વજ્ઞતુલ્યોઽપિ સીદત્યેકો નિરાશ્રયઃ ।
અનર્ઘ્યમપિ માણિક્યં હેમાશ્રયમપેક્ષતે ॥ ૧૬-૧૦
અતિક્લેશેન યદ્દ્રવ્યમતિલોભેન યત્સુખમ્ ।
શત્રૂણાં પ્રણિપાતેન તે હ્યર્થા મા ભવન્તુ મે ॥ ૧૬-૧૧
કિં તયા ક્રિયતે લક્ષ્મ્યા યા વધૂરિવ કેવલા ।
યા તુ વેશ્યેવ સામાન્યા પથિકૈરપિ ભુજ્યતે ॥ ૧૬-૧૨
ધનેષુ જીવિતવ્યેષુ સ્ત્રીષુ ચાહારકર્મસુ ।
અતૃપ્તાઃ પ્રાણિનઃ સર્વે યાતા યાસ્યન્તિ યાન્તિ ચ ॥ ૧૬-૧૩
પ્રિયવાક્યપ્રદાનેન સર્વે તુષ્યન્તિ જન્તવઃ ।
તસ્માત્તદેવ વક્તવ્યં વચને કા દરિદ્રતા ॥ ૧૬-૧૩
ક્ષીયન્તે સર્વદાનાનિ યજ્ઞહોમબલિક્રિયાઃ ।

ન ક્ષીયતે પાત્રદાનમભયં સર્વદેહિનામ્ ॥ ૧૬-૧૪
તૃણં લઘુ તૃણાત્તૂલં તૂલાદપિ ચ યાચકઃ ।
વાયુના કિં ન નીતોऽસૌ મામયં યાચયિષ્યતિ ॥ ૧૬-૧૫
વરં પ્રાણપરિત્યાગો માનભઙ્ગેન જીવનાત્ ।
પ્રાણત્યાગે ક્ષણં દુઃખં માનભઙ્ગે દિને દિને ॥ ૧૬-૧૫
સંસારવિષવૃક્ષસ્ય દ્વે ફલેऽમૃતોપમે ।
સુભાષિતં ચ સુસ્વાદુ સઙ્ગતિઃ સજ્જને જને ॥ ૧૬-૧૮
જન્મ જન્મ યદભ્યસ્તં દાનમધ્યયનં તપઃ ।
તેનૈવાભ્યાસયોગેન દેહી ચાભ્યસ્યતે પુનઃ ॥ ૧૬-૧૯
પુસ્તકસ્થા તુ યા વિદ્યા પરહસ્તગતં ધનમ્ ।
કાર્યકાલે સમુત્પન્ને ન સા વિદ્યા ન તદ્ધનમ્ ॥ ૧૬-૨૦

---

પુસ્તકપ્રત્યયાધીતં નાધીતં ગુરુસન્નિધૌ ।
સભામધ્યે ન શોભન્તે જારગર્ભા ઇવ સ્ત્રિયઃ ॥ ૧૭-૦૧
કૃતે પ્રતિકૃતિં કુર્યાદ્ધિંસને પ્રતિહિંસનમ્ ।
તત્ર દોષો ન પતતિ દુષ્ટે દુષ્ટં સમાચરેત્ ॥ ૧૭-૦૨
યદ્દૂરં યદ્દુરારાધ્યં યચ્ચ દૂરે વ્યવસ્થિતમ્ ।
તત્સર્વં તપસા સાધ્યં તપો હિ દુરતિક્રમમ્ ॥ ૧૭-૦૩
લોભશ્ચેદગુણેન કિં પિશુનતા યદ્યસ્તિ કિં પાતકૈઃ
    સત્યં ચેત્તપસા ચ કિં શુચિ મનો યદ્યસ્તિ તીર્થેન કિમ્ ।
સૌજન્યં યદિ કિં ગુણૈઃ સુમહિમા યદ્યસ્તિ કિં મણ્ડનૈઃ
    સદ્વિદ્યા યદિ કિં ધનૈરપયશો યદ્યસ્તિ કિં મૃત્યુના ॥ ૧૭-૦૪
પિતા રત્નાકરો યસ્ય લક્ષ્મીર્યસ્ય સહોદરા ।
શઙ્ખો ભિક્ષાટનં કુર્યાન્ન દત્તમુપતિષ્ઠતે ॥ ૧૭-૦૫
અશક્તસ્તુ ભવેત્સાધુર્બ્રહ્મચારી વા નિર્ધનઃ ।
વ્યાધિતો દેવભક્તશ્ચ વૃદ્ધા નારી પતિવ્રતા ॥ ૧૭-૦૬
નાન્નોદકસમં દાનં ન તિથિર્દ્વાદશી સમા ।
ન ગાયત્ર્યાઃ પરો મન્ત્રો ન માતુર્દૈવતં પરમ્ ॥ ૧૭-૦૭
તક્ષકસ્ય વિષં દન્તે મક્ષિકાયાસ્તુ મસ્તકે ।
વૃશ્ચિકસ્ય વિષં પુચ્છે સર્વાઙ્ગે દુર્જને વિષમ્ ॥ ૧૭-૦૮
પત્યુરાજ્ઞાં વિના નારી હ્યુપોષ્ય વ્રતચારિણી ।

આયુષ્યં હરતે ભર્તુઃ સા નારી નરકં વ્રજેત્ ॥ ૧૭-૦૯
ન દાનૈઃ શુધ્યતે નારી નોપવાસશતૈરપિ ।
ન તીર્થસેવયા તદ્વદ્ભર્તુઃ પદોદકૈર્યથા ॥ ૧૭-૧૦
પાદશેષં પીતશેષં સન્ધ્યાશેષં તથૈવ ચ ।
શ્વાનમૂત્રસમં તોયં પીત્વા ચાન્દ્રાયણં ચરેત્ ॥ ૧૭-૧૧
દાનેન પાણિર્ન તુ કઙ્કણેન
 સ્નાનેન શુદ્ધિર્ન તુ ચન્દનેન ।
માનેન તૃપ્તિર્ન તુ ભોજનેન
 જ્ઞાનેન મુક્તિર્ન તુ મુણ્ડનેન ॥ ૧૭-૧૨
નાપિતસ્ય ગૃહે ક્ષૌરં પાષાણે ગન્ધલેપનમ્ ।
આત્મરૂપં જલે પશ્યન્ શક્રસ્યાપિ શ્રિયં હરેત્ ॥ ૧૭-૧૩
સદ્યઃ પ્રજ્ઞાહરા તુણ્ડી સદ્યઃ પ્રજ્ઞાકરી વચા ।
સદ્યઃ શક્તિહરા નારી સદ્યઃ શક્તિકરં પયઃ ॥ ૧૭-૧૪
પરોપકરણં યેષાં જાગર્તિ હૃદયે સતામ્ ।
નશ્યન્તિ વિપદસ્તેષાં સમ્પદઃ સ્યુઃ પદે પદે ॥ ૧૭-૧૫
યદિ રામા યદિ ચ રમા યદિ તનયો વિનયગુણોપેતઃ ।
તનયે તનયોત્પત્તિઃ સુરવરનગરે કિમાધિક્યમ્ ॥ ૧૭-૧૬
આહારનિદ્રાભયમૈથુનાનિ
 સમાનિ ચૈતાનિ નૃણાં પશૂનામ્ ।
જ્ઞાનં નરાણામધિકો વિશેષો
 જ્ઞાનેન હીનાઃ પશુભિઃ સમાનાઃ ॥ ૧૭-૧૭
દાનાર્થિનો મધુકરા યદિ કર્ણતાલૈર્દૂરીકૃતાઃ
 દૂરીકૃતાઃ કરિવરેણ મદાન્ધબુદ્ધ્યા ।
તસ્યૈવ ગણ્ડયુગ્મમણ્ડનહાનિરેષા
 ભૃંગાઃ પુનર્વિકચપદ્મવને વસન્તિ ॥ ૧૭-૧૮
રાજા વેશ્યા યમશ્ચાગ્નિસ્તસ્કરો બાલયાચકૌ ।
પરદુઃખં ન જાનન્તિ અષ્ટમો ગ્રામકણ્ટકઃ ॥ ૧૭-૧૯
અધઃ પશ્યસિ કિં બાલે પતિતં તવ કિં ભુવિ ।
રે રે મૂર્ખ ન જાનાસિ ગતં તારુણ્યમૌક્તિકમ્ ॥ ૧૭-૨૦
વ્યાલાશ્રયાપિ વિફલાપિ સકણ્ટકાપિ
 વક્રાપિ પઙ્કિલભવાપિ દુરાસદાપિ ।
ગન્ધેન બન્ધુરસિ કેતકિ સર્વજન્તો-

રેકો ગુણઃ ખલુ નિહન્તિ સમસ્તદોષાન્ ॥ ૧૭-૨૧

ઇતિ ચાણક્યનીતિદર્પણઃ સમ્પૂર્ણઃ ।

Processed and proofread by Sunder Hattangadi

*Chanakya Niti*

pdf was typeset on July 11, 2024

Please send corrections to *sanskrit@cheerful.com*